संस्कृतवार्ता:

दिनाङ्क :-13.02.2025 प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>प्रधानमन्त्री–अमेरिकायात्रा</u>

फ्रांसदेशस्य सफलयात्राया: अनन्तरं प्रधानमन्त्री नरेन्द्रमोदी अमरिकादेशं सम्प्राप्तवान्। द्वयो: देशयो निज-यात्राया: द्वितीये चरणे असौ अद्य वाशिंगटन-डीसी-इति नगरं प्राप्तवान् यत्र असौ अमेरिका देशस्य राष्ट्रपतिना डोनाल्ड-ट्रम्प-इत्यमुना साकं द्विपक्षीयं वार्तालापं विधास्यति। श्रीमोदी अमेरिकीय-राष्ट्रपते: शपथग्रहणानन्तरं अमेरिकादेशं प्रति गम्यमानेषु केषुचित् नेतृषु अन्यतमो वर्तते। इतः पूर्वं द्विपक्षीय-सम्भाषणावसरे, प्रधानमन्त्री मोदी राष्ट्रपति: मैक्रों इत्येष: च भारत-फ्रांस रणनीतिक-कार्यनीतिक-साहमत्यकृते स्वीयां सुदृढ-प्रतिबद्धतां प्रकटितवन्तौ। भारत-फ्रांस-देशाभ्यां प्रधानमन्त्रिण: श्रीनरेन्द्र मोदिन: द्वि-दिवसीय-यात्राया: अवसरे स्वीय कार्य-नीतिक-साहमत्यमपि सुदृढीकृतम् अस्ति। अस्मिन् अवसरे देशद्वयेन प्रौद्योगिकी, नागरिक-परमाणूर्जा, पर्यावरण-स्थिरता, सांस्कृतिक-विनिमय-सन्निभेषु प्रकरणेषु महत्त्वपूर्णेषु दशसु सन्धिपत्रेषु हस्ताक्षराणि कृतानि।

एतै: साहमत्यै: भारत-फ्रांसयो: मध्ये रणनीतिक -सम्बन्धा: अतोऽपि दृढतरा: भविष्यन्ति। एतस्य पश्चात् मार्से-नगरं सम्प्राप्य प्रतिनिधिमंडल-स्तरीया मन्त्रणा जाता। अत्रावसरे उभाभ्याम् अपि नेतृभ्यां व्यापार-निवेश-सम्बन्धानां वर्धनार्थम् अपि आह्वानं कृतम्।

<u>तुलसी-गबार्डइत्यसौ</u>

तुलसी-गबार्ड इत्यसौ ट्रम्प-प्रशासनस्य अधीने अमरिकादेशस्य राष्ट्रियान्वेषणविभागस्य नूतना निदेशिका सुनिश्चिता जाता इति। राष्ट्रपते: डोनाल्ड-ट्रम्पस्य रुचियुतां गबार्डइत्येतां अमेरिकादेशस्य विभिन्नानां गुप्तचरसंस्थानां कार्यस्य निरीक्षणार्थं समन्वयार्थं च तस्या: नामाङ्कने ह्य: बहुप्रतीक्षितम् अन्तिम् सीनेट्-इति मतम् अवाप्नोत्।

<u>आय-कर-विधेयकम्, 2025</u>

आय-कर-विधेयकम्, पञ्चविंशत्यधिकद्विसहस्रतमवर्षीयम् अद्य लोकसभायां प्रस्तोष्यते। आय-करसम्बद्ध-विधिं एकीकृतं संशोधनं च लक्ष्यीकृत्य निर्मितं विधेयकमिदं सदनस्य कार्येषु सूचीबद्धम् अस्ति। वित्तमन्त्री निर्मला सीतारामन इत्येषा स्वस्य अर्थसंकल्पना-भाषणे नूतनं आयकर-विधेयकम् आनेतुं घोषणां कृतवती। अनया इत्यपि घोषितं यत् प्रतिवर्षं द्वादश लक्षरूप्यकाणि यावत् अर्जयन्तः जनाः आयकरं न दद्युः इति। वक्फ्-संशोधन-विधेयकम्, चतुर्विंशत्यधिकद्विसहस्रतमं आलक्ष्य संयुक्तसमित्याः प्रतिवेदनमपि अद्य लोकसभायां राज्यसभायां च प्रस्तूयते, यतोहि संसद: अर्थसंकल्पना-सत्रस्य प्रथमभागस्य अद्य अन्तिमं दिनम् अस्ति।

<u>भारत-मुद्रा-स्फीति:</u>

भारतस्य विकीर्ण-मुद्रास्फीति: जनवरीमासे अपचीय चत्वारि दशमलव त्रीणि एकं मितम् यावत् आगतम्। यद्धि पञ्च-मासेषु निम्नतम: स्तर: वर्तते। सांख्यिकी-कार्यक्रम-कार्यान्वियन-मन्त्रालयेन प्रकाशितस्य दत्तांशानुसारेण ग्रामीणक्षेत्रेषु मुद्रास्फीति: चत्वारि दशमलव षड् चत्वारि प्रतिशतं पञ्जीकृतम् अस्ति। तत्रैव नगरीयक्षेत्रेषु त्रीणि दशमलव अष्ट सप्त प्रतिशतं पंजीकृतम्।

<u>विश्वरेडियोदिवस:</u>

विश्व-रेडिया-दिवसस्य पूर्व-सन्ध्यायाम् आकाशवाणी नवदिल्ल्या: पण्डित-रविशङ्कर-इत्येतस्मिन् शिल्पालये ह्य: राग-रेडियो-रङ्ग-रेडियो इति कार्यक्रमं समायोजितवती। एतस्मिन् कार्यक्रमे प्रसिद्धा गायिका सीतावसन्तलक्ष्मी: अभिनेता योगेन्द्र-टिक्कूइत्यादय: पटकथालेखक: डॉ. सुभाष-चन्द्रा इत्यादय: विशिष्टजना: उपस्थिता: असान्।

।। <u>इति वार्ता:</u>।।